# ককারাদিকালীশতনামস্তোত্রম্

{॥ ককারাদিকালীশতনামস্তোত্রম্ ॥}

শ্রীদেব্যুবাচ-

নমস্তে পার্বতীনাথ বিশ্বনাথ দযাময ।

জ্ঞানাত্ পরতরং নাস্তি শ্রুতং বিশ্বেশ্বর প্রভো ॥ ১॥

দীনবন্ধো দযাসিন্ধো বিশ্বেশ্বর জগৎপতে ।

ইদানীং শ্রোতুমিচ্ছামি গোপ্যং পরমকারণম্ ।

রহস্যং কালিকাযশ্চ তারাযাশ্চ সুরোত্তম ॥ ২॥

শ্রীশিব উবাচ-

রহস্যং কিং বদিষ্যামি পঞ্চবক্ত্রৈর্মহেশ্বরী ।

জিহ্বাকোটিসহস্রৈস্তু বক্ত্রকোটিশতৈরপি ॥ ৩॥

বক্তুং ন শক্যতে তস্য মাহাত্ম্যং বৈ কথঞ্চন ।

তস্যা রহস্যং গোপ্যঞ্চ কিং ন জানাসি শংকরী ॥ ৪॥

স্বস্যৈব চরিতং বক্তুং সমর্থা স্বযমেব হি ।

অন্যথা নৈব দেবেশি জ্ঞাযতে তত্ কথঞ্চন ॥ ৫॥

কালিকাযাঃ শতং নাম নানা তন্ত্রে ত্বযা শ্রুতম্ ।

রহস্যং গোপনীয়ঞ্চ তত্রেঽস্মিন্ জগদম্বিকে ॥ ৬॥

করালবদনা কালী কামিনী কমলা কলা ।

ক্রিয়াবতী কোটরাক্ষী কামাক্ষ্যা কামসুন্দরী ॥ ৭॥

কপালা চ করালা চ কালী কাত্যায়নী কুহুঃ ।

কঙ্কালা কালদমনা করুণা কমলার্চ্চিতা ॥ ৮॥

কাদম্বরী কালহরা কৌতুকী কারণপ্রিয়া ।

কৃষ্ণা কৃষ্ণপ্রিয়া কৃষ্ণপূজিতা কৃষ্ণবল্লভা ॥ ৯॥

কৃষ্ণাপরাজিতা কৃষ্ণপ্রিয়া চ কৃষ্ণরূপিনী ।

কালিকা কালরাত্রীশ্চ কুলজা কুলপণ্ডিতা ॥ ১০॥

কুলধর্মপ্রিয়া কামা কাম্যকর্মবিভূষিতা ।

কুলপ্রিয়া কুলরতা কুলীনপরিপূজিতা ॥ ১১॥

কুলজ্ঞা কমলাপূজ্যা কৈলাসনগভূষিতা ।

কূটজা কেশিনী কাম্যা কামদা কামপণ্ডিতা ॥ ১২॥

করালাস্যা চ কন্দর্পকামিনী রূপশোভিতা ।

কোলম্বকা কোলরতা কেশিনী কেশভূষিতা ॥ ১৩॥

কেশবস্যপ্রিয়া কাশা কাশ্মীরা কেশবার্চ্চিতা ।

কামেশ্বরী কামরুপা কামদানবিভূষিতা ॥ ১৪॥

কালহন্ত্রী কূর্মমাংসপ্রিয়া কূর্মাদিপূজিতা ।

কোলিনী করকাকারা করকর্মনিষেবিণী ॥ ১৫॥

কটকেশ্বরমধ্যস্থা কটকী কটকার্চ্চিতা ।

কটপ্রিয়া কটরতা কটকর্মনিষেবিণী ॥ ১৬॥

কুমারীপূজনরতা কুমারীগণসেবিতা ।

কুলাচারপ্রিয়া কৌলপ্রিয়া কৌলনিষেবিণী ॥ ১৭॥

কুলীনা কুলধর্মজ্ঞা কুলভীতিবিমর্দ্দিনী ।

কালধর্মপ্রিয়া কাম্য-নিত্যা কামস্বরূপিণী ॥ ১৮॥

কামরূপা কামহরা কামমন্দিরপূজিতা ।

কামাগারস্বরূপা চ কালাখ্যা কালভূষিতা ॥ ১৯॥

ক্রিয়াভক্তিরতা কাম্যানাঞ্চৈব কামদাযিনী ।

কোলপুষ্পম্বরা কোলা নিকোলা কালহান্তরা ॥ ২০॥

কৌষিকী কেতকী কুন্তী কুন্তলাদিবিভূষিতা ।

ইত্যেবং শৃণু চার্বঞ্গি রহস্যং সর্বমঞ্গলম্ ॥ ২১॥

ফলশ্রুতি-

যঃ পঠেত্ পরযা ভক্ত্যা স শিবো নাত্র সংশযঃ ।

শতনামপ্রসাদেন কিং ন সিদ্ধতি ভূতলে ॥ ২২॥

ব্রহ্মা বিষ্ণুশ্চ রুদ্রশ্চ বাসবাদ্যা দিবৌকসঃ ।

রহস্যপঠনাদ্দেবি সর্বে চ বিগতজ্বরাঃ ॥ ২৩॥

ত্রিষু লোকেশু বিশ্বেশি সত্যং গোপ্যমতঃ পরম্ ।

নাস্তি নাস্তি মহামাযে তন্ত্রমধ্যে কথঞ্চন ॥ ২৪॥

সত্যং বচি মহেশানি নাতঃপরতরং প্রিযে ।

ন গোলোকে ন বৈকুণ্ঠে ন চ কৈলাসমন্দিরে ॥ ২৫॥

রাত্রিবাপি দিবাভাগে যদি দেবি সুরেশ্বরী ।

প্রজপেদ্ ভক্তিভাবেন রহস্যস্তবমুত্তমম্ ॥ ২৬॥

শতনাম প্রসাদেন মন্ত্রসিদ্ধিঃ প্রজাযতে ।

কুজবারে চতুর্দ্দশ্যাং নিশাভাগে জপেত্তু যঃ ॥ ২৭॥

স কৃতী সর্বশাস্ত্রজ্ঞঃ স কুলীনঃ সদা শুচিঃ ।

স কুলজ্ঞঃ স কালজ্ঞঃ স ধর্ম্মজ্ঞো মহীতলে ॥ ২৮॥

রহস্য পঠনাত্ কোটি-পুরশ্চরণজং ফলম্ ।

প্রাপ্নোতি দেবদেবেশি সত্যং পরমসুন্দরী ॥ ২৯॥

স্তবপাঠাদ্ বরারোহে কিং ন সিদ্ধতি ভূতলে ।

অণিমাদ্যষ্টসিদ্ধিশ্চ ভবেত্যেব ন সংশযঃ ॥ ৩০॥

রাত্রৌ বিল্বতলেঽশ্বথ্থমূলেঽপরাজিতাতলে ।

প্রপঠেত্ কালিকা-স্তোত্রং যথাশক্ত্যা মহেশ্বরী ॥ ৩১॥

শতবারপ্রপঠনান্মন্ত্রসিদ্ধির্ভবেদ্ধ্রুবম্ ।

নানাতন্ত্রং শ্রুতং দেবি মম বক্ত্রাত্ সুরেশ্বরী ॥ ৩২॥

মুণ্ডমালামহামন্ত্রং মহামন্ত্রস্য সাধনম্ ।

ভক্ত্যা ভগবতীং দুর্গাং দুঃখদারিদ্র্যনাশিনীম্ ॥ ৩৩॥

সংস্মরেদ্ যো জপেদ্ধ্যাযেত্ স মুক্তো নাত্র সংশয ।

জীবন্মুক্তঃ স বিজ্ঞেযস্তন্ত্রভক্তিপরাযণঃ ॥ ৩৪॥

স সাধকো মহাজ্ঞানী যশ্চ দুর্গাপদানুগঃ ।

ন চ ভক্তির্ন বাহভক্তির্ন মুক্তির্নগনন্দিনি ॥ ৩৫॥

বিনা দুর্গাং জগদ্ধাত্রী নিষ্ফলং জীবনং ভভেত্ ।

শক্তিমার্গরতো ভূত্বা যোঽন্যমার্গে প্রধাবতি ॥ ৩৬॥

ন চ শাক্তাস্তস্য বক্তুং পরিপশ্যন্তি শংকরী ।

বিনা তন্ত্রাদ্ বিনা মন্ত্রাদ্ বিনা যন্ত্রান্মহেশ্বরী ॥ ৩৭॥

ন চ ভুক্তিশ্চ মুক্তিশ্চ জায়তে বরবর্ণিনী ।

যথা গুরুর্মহেশানি যথা চ পরমো গুরুঃ ॥ ৩৮॥

তন্ত্রাবক্তা গুরুঃ সাক্ষাদ্ যথা চ জ্ঞানদঃ শিবঃ ।

তন্ত্রঞ্চ তন্ত্রবক্তারং নিন্দন্তি তান্ত্রীকীং ক্রিয়াম্ ॥ ৩৯॥

যে জনা ভৈরবাস্তেষাং মাংসাস্থিচর্বণোদ্যতাঃ ।

অতএব চ তন্ত্রজ্ঞং স নিন্দন্তি কদাচন ।

ন হন্তন্তি ন হিংসন্তি ন বদন্ত্যন্যথা বুধা ॥ ৪০॥

॥ ইতি মুণ্ডমালাতন্ত্রেঽষ্টমপটলে দেবীশ্বর সংবাদে

কালীশতনামস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by Kunal Mukherjee kunal at neo.tamu.edu

Please send corrections to sanskrit@cheerful.com

Last updated ৄoday

http://sanskritdocuments.org

Kakaradi Kali Ashtottara Shatanama Stotram Lyrics in Bengali PDF
% File name : kakArAdishata.itx
% Category : aShTottarashatanAma
% Location : doc_devii
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Kunal Mukherjee kunal at neo.tamu.edu
% Proofread by : Kunal Mukherjee kunal at neo.tamu.edu
% Description-comments : muNDamAlA tantra. It is ment for daxiNAkAlI.
% Latest update : May 9, 2006
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website